# શ્રીલલિતોક્તતોટકાષ્ટકમ્

Shri Lalitoktatotakashtakam

sanskritdocuments.org

February 23, 2019

# Shri Lalitoktatotakashtakam

# શ્રીલલિતોક્તતોટકાષ્ટકમ્

## Sanskrit Document Information

Text title : lalitoktatoTakAShTakam

File name : lalitoktatoTakAShTakam.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA, aShTaka

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 23, 2019

*sanskritdocuments.org*

# શ્રીલલિતોક્તતોટકાષ્ટકમ્

નયનેરિતમાનસભૂવિશિખઃ
    શિરસિ પ્રચલપ્રચલાકશિખઃ ।
મુરલીધ્વનિભિઃ સુરભીસ્ત્વરયન્
    પશુપીવિરહવ્યસનં તિરયન્ ॥ ૧॥

પરિતો જનનીપરિતોષકરઃ
    સખિ લમ્પટયન્નખિલં ભુવનમ્ ।
તરુણીહૃદયં કરુણી વિદધત્
    તરલં સરલે કરલમ્બિગુણઃ ॥ ૨॥

દિવસોપરમે પરમોલ્લસિતઃ
    કલશસ્તનિ હે વિલસદ્ધસિતઃ ।
અતસીકુસુમં વિહસન્મહસા
    હરિણીકુલમાકુલયન્ સહસા ॥ ૩॥

પ્રણયિપ્રવણઃ સુભગશ્રવણ
    પ્રચલન્મકરઃ સસખિપ્રકરઃ ।
મદયન્નમરીર્ભ્રમયન્ ભ્રમરી
    મિલિતઃ કતિભિઃ શિખિનાં તાતભિઃ ॥ ૪॥

અયમુજ્જ્વલયન્ વ્રજભૂસરણીં
    રમયન્ ક્રમણૈર્મૃદુભિર્ધરણીમ્ ।
અજિરે મિલિતઃ કલિતપ્રમદે
    હરિરુદ્ધિજસે તદપિ પ્રમદે ॥ ૫॥

વદ મા પરુષં હૃદયે ન રુષં
    રચય ત્વમતશ્ચલ વિભ્રમતઃ ।
ઉદિતે મિહિકાકિરણે ન હિ કા
    રભસાદયિ તં ભજતે દયિતમ્ ॥ ૬॥

કલય ત્વરયા વિલસત્સિચયઃ
  પ્રસરત્યભિતો યુવતીનિચયઃ ।
નિદધાતિ હરિર્નયનં સરણૌ
  તવ વિક્ષિપ સપ્રણયં ચરણૌ ॥ ૭॥

ઇતિ તામુપદિશ્ય તદા સ્વસખીં
  લલિતા કિલ માનિતયા વિમુખીમ્ ।
અનયત્ પ્રસભાદિવ યં જવતઃ
  કુરુતાત્ સ હરિર્ભવિકં ભવતઃ ॥ ૮॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં શ્રીલલિતોક્તતોટકાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Lalitoktatotakashtakam*
pdf was typeset on February 23, 2019

Please send corrections to *sanskrit@cheerful.com*